শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীচিরঞ্জীৱিরামাযণম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীচিরঞ্জীৱিরামাযণম্ ॥

পাযাৎ ক্ষীরাব্ধিশাযী কমলভৱনুতঃ কোসলেন্দ্রস্য পুত্রো
    রামঃ সৌমিত্রিযুক্তঃ কুশিকসুতগিরা তাটকাপ্রাণহারী।
যজ্ঞং নির্ৱর্ত্য গঙ্গাসুচরিতমুদিতঃ পাৱযংস্তামহল্যাং
    সীতামুদ্বাহ্য জিৎৱা পথি ভৃগুতনযং প্রাপ্য হর্ষাদযোধ্যাম্॥ 1 ॥

শ্রীরামং নৌমি কৈকেয্যভিলষিতৱরাৎ খিন্নমালোক্য তাতং
    তদ্বাচা ত্যক্তরাজ্যং ঝটিতি ৱনগতং মৈথিলীলক্ষ্মণাভ্যাম্।
স্ৱর্গস্থে রাজ্ঞি শোকাৎ কৃতনুতিভরতপ্রার্থনাৎ পাদুকে স্ৱে
    দত্ত্বাস্মৈ তন্নিৱৃত্ত্যা স্থিতমনুজযুতং সেৱিতং চিত্রকূটে॥ 2 ॥

হৎৱারণ্যে ৱিরাধং মুনিনিকরমুদে পঞ্চৱট্যামুষিৎৱা
    ৱৈরূপ্যাৎ শূর্পণখ্যাঃ কুপিতখরমুখান্ ধ্ৱংসযিৎৱার্ধযামম্।
মারীচং মর্দযিৎৱা দশৱদনহৃতাং তত্র সীতামদৃষ্টৱা
    দগ্ধ্ৱা ক্রুদ্ধং কবন্ধং শবরিৱনিতযা পূজিতং রামমীডে॥ 3 ॥

পম্পাতীরে হনূমৎপটুতরৱচনাদৃশ্যমূকং চ গৎৱা
    কৃৎৱা সুগ্রীৱসখ্যং নিশিতশরৱরৈঃ সপ্তসালাংশ্চ ভিত্ত্বা।
হৎৱা সুত্রামপুত্রং দিনকরজনুষস্তস্য রাজ্যং চ দত্ত্বা
    তেনানীতৈঃ কপীশৈর্ৱিচিতসকলভূমণ্ডলং রামমীডে॥ 4 ॥

সেতুং বদ্ধ্ৱা সমুদ্রে সকলবলযুতং রাৱণং কুম্ভকর্ণং
    হৎৱা তৎপুত্রৱর্গং তদনুজমভিষিচ্যাথ লঙ্কাধিনাথম্।
সীতাং লব্ধ্ৱাগ্নিশুদ্ধাং সকলসুরনুতং পুষ্পযানাধিরূঢং
    সুগ্রীৱাদ্যৈরুপেতং রঘুপতিমনিশং প্রাপ্তরাজ্যং নমামি॥ 5 ॥

সকৃদপি যদি রামেত্যুচ্চরন্ যস্তু মর্ত্যঃ
    সকলদুরিতসঙ্ঘৈঃ সংযুতো ৱাপি নূনম্।
ন নিৱসতি স মাতুর্গর্ভৱাসী কদাচিৎ
    নিৱসতি হরিলোকে নাস্তি সন্দেহলেশঃ ॥ **6** ॥

॥ ইতি শ্রীচিরঞ্জীৱিরামাযণং সমাপ্তম্ ॥